हन्तेः [1]धातोः टक् प्रत्ययो [2]भवति, तस्मिंश्च परतो [3]हन्तेः [4]टिलोपो घत्वं च [5]निपात्यते । [6]पाणिघः । ताडघः । शिल्पिनि इति किम् ? [7]पाणिघातः । ताडघातः ।

[२६०] [8]राजघ उपसङ्ख्यानम् । (म. भा. २. १०४)
राजानं हन्ति राजघः ॥

## आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् । (५६/२०७३)

आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेषु अच्व्यन्तेषु करोतेः धातोः [9]करणे कारके ख्युन् प्रत्ययो भवति । च्वेर्विकल्पेन विधानाद् द्विविधाः च्व्यर्थाः, [10]च्व्यन्ता अच्व्यन्ताश्च । [11]तत्र च्व्यन्ताः पर्युदस्यन्ते । अनाढ्यं आढ्यं [12]कुर्वन्ति अनेन आढ्यङ्करणम् । सुभगङ्करणम्[13] । स्थूलङ्करणम् । पलितङ्करणम् । नग्नङ्करणम् । अन्धङ्करणम् । प्रियङ्करणम् । च्व्यर्थेषु इति किम् ? आढ्यं [14]तैलेन कुर्वन्ति अभ्यञ्जयन्ति इत्यर्थः । प्रकृतेरविवक्षायामभूत– [15]प्रादुर्भावेऽपि प्रत्युदाहरणं भवति । अच्वौ इति किम् ? आढ्यीकुर्वन्त्यनेन ।

ननु च ख्युना मुक्ते[16] ल्युटा भवितव्यम्, न च [17]ल्युटः ख्युनश्च विशेषोऽस्ति, (म. भा. २. १०५) तत्र किं प्रतिषेधेन ? एवं तर्हि प्रतिषेधसामर्थ्यात् ख्युनि असति ल्युडपि न भवति, [18]तेन ल्युटोऽप्ययमर्थतः प्रतिषेधः । [19]उत्तरार्थश्च च्विप्रतिषेधः क्रियते ॥

## कर्तरि भुवः खिष्णुच्खुकञौ । (५७/२०७४)

आढ्यादिषु [20]सुबन्तेषु उपपदेषु च्व्यर्थेषु अच्व्यन्तेषु भवतेर्धातोः कर्तरि कारके [21]खिष्णुच्, खुकञ् इत्येतौ प्रत्ययौ भवतः । अनाढ्य आढ्यो भवति आढ्यंभविष्णुः, आढ्यंभावुकः । सुभगंभविष्णुः, सुभगंभावुकः । स्थूलं-भविष्णुः, स्थूलंभावुकः । पलितंभविष्णुः, [22]पलितंभावुकः । नग्नंभविष्णुः, नग्नंभावुकः । अन्धंभविष्णुः, अन्धं–भावुकः । प्रियंभविष्णुः, प्रियंभावुकः । कर्तरि इति किम् ? करणे मा भूत् । च्व्यर्थेषु इत्येव, आढ्यो भविता । अच्वौ इत्येव, आढ्यीभविता ।

[23]उदात्तत्वाद् भुवः सिद्धमिकारादित्वमिष्णुचः ।
नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ॥ (म.भा.२.१०६)

## स्पृशोऽनुदके क्विन । (५८/४३२)

स्पृशेर्धातोरनुदके सुबन्त उपपदे क्विन् प्रत्ययो भवति । ननु सकर्मकत्वात् स्पृशेः [24]कर्मैवोपपदं प्राप्नोति? नैष दोषः । कर्तरि इति पूर्वसूत्रादनुवर्तते, तत् कर्तृप्रचयार्थं [25]विज्ञायते । सुबन्तमात्रे [26]चोपपदे कर्तृप्रचयो लभ्यते घृतं स्पृशति[27] घृतस्पृक् । [28]मन्त्रेण स्पृशति मन्त्रस्पृक् । [29]जलेन स्पृशति जलस्पृक् । अनुदके इति किम् ? उदकस्पर्शः । नकारः 'क्विन्प्रत्ययस्य कुः' (८.२.६२/३७७) इति विशेषणार्थः ॥

---

1. धातोः नास्ति ह. 3. भवति नास्ति क. ड. 3. हन्तेः नास्ति क. फ, परतो हन्तेः नास्ति ह. 4. टिलोपघत्वे ह. 5. निपात्यते नास्ति ह. 6. पाणिघातः ताडघातः ह. 7. पाणिघातः नास्ति ह. 8. राजक ह. 9. करणे कारके नास्ति ब, करणकारके ह. 10. आढ्यादयः इत्यधिकम् क. ड, च्व्यन्ता नास्ति फ. 11. तत्र नास्ति फ. 12. करोति अ. 13. औषधम् इत्यधिकम् अ. ग. 14. तैलेन नास्ति फ. 15. प्रादुर् नास्ति अ. क. 16. पक्षे इत्यधिकम् अ. ड, करणाधिकरणयोश्च ल्युटः इति पक्षे इत्यधिकम् क. 17. ल्युट् ह. 18. तेन नास्ति फ. 19. उत्तरार्थं च क. 20. सुबन्तेषु च्व्यर्थेषु अच्व्यर्थेषु उपपदेषु ह. 21. खिष्णुच्खुकञौ प्रत्ययौ ब. ह. 22. पलितंभावुकः नास्ति ह. 23. इष्णुच इकारादित्वमुदात्तत्वात् (म. भा. 2. 106). 24. कर्मण उपपदत्वम ब. क. 25. विज्ञास्यते ब. क. 26. च नास्ति ब. 27. इति इत्यधिकम् ह. 28. मन्त्रेण स्पृशति नास्ति ब. फ. ह. 29. जले स्पृशति क, दशेन स्पृशति दशस्पृक् ग, हलस्पृक् ह.